© UNIVERSAL RESEARCH REPORTS | REFEREED | PEER REVIEWED
ISSN : 2348 - 5612 | Volume : 09 , Issue : 04 | October - December 2022

# महाभारतस्य आदिपर्वणः आस्तीकोपपर्वणि नृपतेर्गुणानां परिशीलनम्

शोधकर्ता
**डॉ॰ उमेश कुमार**
सहायक प्राध्यापक,
सत् जीन्दा कल्याणा महाविद्यालय
कलानौर, रोहतक (हरियाणा)124113
ईमेल–umeshsanskrit@gmail.com

महर्षिवेदव्यासेन विरचितं महाभारतं सामान्यं महाकाव्यं न वर्तते अपितु भारतवर्षस्य प्राचीनतमायाः संस्कृतेः इतिहासस्य च आधारभूतो ग्रन्थो वर्तते। स्वप्रतिपाद्यबाहुल्यदृष्ट्या महाभारतम् केवलम् स्वयमेव स्वकीयमुपमानमस्ति। स्वस्मिन् प्रतिपाद्यबाहुल्यात् हेतोः अस्य घोषणा अस्ति यत् धर्मार्थकाममोक्षाणाम् पुरुषार्थानाम् विषये यदत्र प्राप्यते तदन्यत्र प्राप्तुं शक्यते, किन्तु यदत्र नास्ति तदन्यत्र कुत्रापि नास्ति।

महाभारतस्य विस्तृताध्ययनेन ज्ञायते यत् अस्माकं भारतीया संस्कृतिः सर्वदा ज्ञानविज्ञानकलासम्पूर्णा चाऽऽसीत्। धर्मार्थकाममोक्षविषयकं निखिलं ज्ञानं महाभारते वर्णितमस्ति नात्र संशयः। अयं ग्रन्थः केवलं परिमाणे एव विशालतमः नास्ति अपितु अर्थस्य भावस्य ज्ञानविज्ञानयोः विषयेऽपि अनुपमेयम् रचना ्। पूर्वोक्तकारणैरेव 'भारतं पञ्चमो वेदः' इति विद्वद्भिः कथ्यते। यत्र वेदाः क्लिष्टत्वाद् अज्ञानत्वाद् वा पाठकेभ्यः अरोचकं प्रतीयते, तद्विपरीतः महाभारतं रुचिकराख्यानरूपे जनसामान्यं समाकर्षति। ज्ञानप्राचुर्यात् ग्रन्थोऽयं विश्वकोशरूपे प्रसिद्धः वर्तते। शोधपत्रस्याऽस्य शीर्षकमस्ति – '' महाभारतस्य आदिपर्वणः आस्तीकोपपर्वणि नृपतेर्गुणानां परिशीलनम्''। महाकाव्यमिदमष्टादशपर्वसु विभक्तं वर्तते। अस्य प्रथमं पर्वः आदिपर्वनाम्ना प्रसिद्धं वर्तते। आदिपर्वणि एकोनविंशति–उपपर्वाणि सन्ति तेषु आस्तीकपर्वः पञ्चमं वर्तते। चतुर्थे पौलोमपर्वणि सर्पसत्रस्य प्रस्तावना

वर्णिताऽस्ति। तदनन्तरं आस्तीकपर्वणि जनमेजयस्य आस्तीकस्य च विस्तृतं वर्णनं प्राप्यते। यायावरेषु श्रेष्ठस्य जरत्कारुमुनेः निजपितृणां प्रेरणया विवाहायोद्योगं दृश्यतेऽस्मिन् पर्वणि। आस्तीकः जरत्कारुमुनेरेव तपस्वीपुत्रः आसीत्। आस्तीकः सर्पसत्रे नष्टप्रायस्य नागवंशस्य रक्षां कृतवान्। जनमेजयः राज्ञः परीक्षितस्य पुत्रः आसीत्। यदा जनमेजयः स्वपितुः विषये मन्त्रिणः अपृच्छत् तदा ते विस्तरेण राज्ञः परीक्षितस्य धर्माचरणानां उत्तमगुणानाञ्च वर्णनम् कृतवान्। आधुनिकसन्दर्भे तत्तद्गुणानां परिशीलनमत्र क्रियते। मन्त्रिणः ऊचुः यत् –

'धर्मात्मा च महात्मा च प्रजापालः पिता तव।
आसीदिह यथावृत्तः स महात्मा शृणुष्व तत्[1]।।'

अत्र द्रष्टव्यमस्ति यत् राज्ञः गुणेषु परिगणितं सर्वप्रथमः गुणः वर्तते 'धर्मात्मा' इति। श्रीनीलकण्ठमहोदयः तु भारतभावदीपटीकायां लिखितवान् ''धर्मात्मा उदारचित्तः। महात्मा महानुभावः कलिनिग्राहकत्वात्[2] ।''इति ।। धर्मात्माशब्दः विशालमर्थमाधत्ते। आत्माशब्देनात्र प्रधानत्वं गृह्यते। राज्ञः विचारेषु कार्येषु च धर्मस्य प्रधानत्वमत्यन्तमावश्यकं वर्तते। सर्वथा राजधर्मस्य पालनं भवेत् राज्ञः संकल्पः। धर्महीनः राजा प्रजाहिते साफल्यं प्राप्तुं नैव शक्नोति। परीक्षितः कलियुगस्य निग्रहणं कृतवान् अतः सः महान् राजा आसीत्।

'प्रजापालः पिता तव' इत्यत्र ध्यात्तव्यमस्ति यत् 'पिता' शब्दः प्रजापालः तव चेतिशब्दयोः मध्ये सुस्थिते अर्थगाम्भीर्यं वितनोति। जनमेजयस्य पिता प्रजापालकः प्रजायै पिता इव चासीत्। आधुनिककालेऽपि राजा अर्थात् शासकः धर्मात्मा महात्मा पिता इव प्रजापालकः च भवेत्।

---

[1] महर्षिवेदव्यासप्रणीतं महाभारतम् – 1.49.7
[2] महर्षिवेदव्यासप्रणीतं महाभारतम् – भारतभावदीपटीका – पृष्ठ संख्या – 313

© UNIVERSAL RESEARCH REPORTS | REFEREED | PEER REVIEWED
ISSN : 2348 - 5612 | Volume : 09 , Issue : 04 | October - December 2022

राज्ञः परीक्षितस्य काले समाजव्यवस्था सुदृढा प्रशंसनीया चासीत्। चतुर्वर्णानां जनाः स्वधर्मे निष्ठिताः आसन्। तद्यथा –

"चातुवर्ण्यं स्वधर्मस्थं स कृत्वा पर्यरक्षत।
धर्मतो धर्मविद्राजा धर्मो विग्रहवानिव[3]।।" इति

वर्तमानपरिदृश्ये अपि शासकेन संवैधानिकव्यवस्थायाः पालनं सर्वथा क्रियते। राज्यस्य रक्षायाः पूर्णदायित्त्वमपि नृपस्य एव भवति। सर्वेषां भूतानां प्रति समत्वं शासकस्य धर्मः वर्तते। नागरिकैरपि सर्वदा स्वधर्मस्य पालनं कर्त्तव्यम्। यथा चोक्तं तत्रैव :

"समः सर्वेषु भूतेषु प्रजापतिरिवाभवत्।
ब्राह्मणः क्षत्रिया वैश्याः शूद्राश्चैव स्वकर्मसु।।
स्थिताः सुमनसो राजंस्तेन राज्ञा स्वधिष्ठिताः।
विधवानाथविकलान्कृपणांश्च बभार सः[4]।।इति।।

राजा परीक्षितः विधवानां अनाथानां विकलाङ्.गानां दीनजनानां च कृते विशिष्टां भरणपोषणव्यवस्थामकार्षीत्। इदृशी व्यवस्था अनिवार्या वर्तते। साम्प्रतमपि असहासयजनानां कृते सर्वकारेण विशिष्टा व्यवस्था क्रियते एव।

प्रजायै राजा आदर्शः भवति। नागरिकाः राजानमनुसरन्ति। उक्तिरियं प्रसिद्धास्तियत् यथा राजा तथा प्रजा। अस्मात् कारणात् नृपः स्वाचरणेन प्रजायै आदर्शं संस्थापयेत्। यथा परीक्षितविषये मन्त्रिणः उक्तवन्तः।

"जितेन्द्रियश्चात्मवांश्च मेधावी धर्मसेविता।
षड्वर्गजिन्महाबुद्धिर्नीतिशास्त्रविदुत्तमः[5]।।"

आदर्शनृपः जितेन्द्रियः मेधावी धर्मसेवकः नीतिज्ञः च स्यात्। अस्य श्लोकस्य टीकायां श्रीनीलकण्ठमहोदयः कथयति यत् – 'आत्मवान् बुद्धिमान्

---

[3] महर्षिवेदव्यासप्रणीतं महाभारतम् – 1.49.8
[4] महर्षिवेदव्यासप्रणीतं महाभारतम् – 1.49.10, 11
[5] महर्षिवेदव्यासप्रणीतं महाभारतम् 1.49.16

© UNIVERSAL RESEARCH REPORTS | REFEREED | PEER REVIEWED
ISSN : 2348 - 5612 | Volume : 09 , Issue : 04 | October - December 2022

मेधावी बहुग्रन्थधारणसमर्थः। षड्वर्गः कामादिस्तस्य जेता षड्वर्गजित् नीतिशास्त्रं कामन्दकीयपालकाव्यादि [6] ।।'' इति।। राजा परीक्षितः कामक्रोधलोभमोहमदमात्सर्यादिषड्वर्गं जितवान्। वस्तुतः शासकः इदृशानां वैयक्तिकगुणानां स्वामी स्यात् तर्हि जनाः तनमुसरन्ति। सर्वे जनाः रामराज्यं प्रशंसन्ति इच्छन्ति च। महर्षिवाल्मीकिरचितस्य रामायणस्य प्रथमसर्गेऽपि आदर्शनृपस्य गुणाः वर्णिताः सन्ति। तपस्वी वाल्मीकिः मुनिपुड्.गवम् नारदं पृच्छति यत् –

'कोन्वस्मिन् साम्प्रतं लोके गुणवान्कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।।
चारित्रेण च को युक्तः सर्वभूतेषु को हितः।
विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः।।
आत्मवान्को जितक्रोधो द्युतिमान्कोऽनसूयकः।।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे[7] ।।'

महर्षेः वाल्मीकिनः प्रश्नं संश्रुत्य नारदः इक्ष्वाकुवंशोत्पन्नस्य श्रीरामस्य विषये कथयति यत् श्रीरामः सर्वगुणसम्पन्नः वर्तते तस्मिन् च आदर्शनृपस्य सर्वे गुणाः विद्यमानाः सन्ति। तद्यथा –

'इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी।।
बुद्धिमान्नीतिमान् वाग्मी श्रीमान्शत्रुनिबर्हणः।
विपुलासो महाबाहुः कम्बुग्रीवो महाहनुः[8] ।।'' इति

आदर्श नृपस्य श्रीरामस्य गुणानां वर्णने

नारदः चारित्रिकविशेषणानामपि गणनां करोति। यथा चोक्तं तत्रैव –

---

[6] महर्षिवेदव्यासप्रणीतं महाभारतम् – भारतभावदीपटीका – पृष्ठ संख्या 313, 314
[7] महर्षिवाल्मीकिप्रणीतं रामायणम् – 1.1, 2, 3, 4
[8] महर्षिवाल्मीकिप्रणीतं रामायणम् – 1.1.8, 9

© UNIVERSAL RESEARCH REPORTS | REFEREED | PEER REVIEWED
ISSN : 2348 - 5612 | Volume : 09 , Issue : 04 | October - December 2022

''धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान्।।
प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः।
रक्षिता जीवलोकस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्.गतत्त्वज्ञो धनुर्वेदे च निष्ठितः[9]।।''

निष्कर्ष :

निष्कर्षरूपेण वक्तुं शक्नुमः यत् आदर्शशासकः परीक्षिततुल्यः श्रीरामतुल्यः वा भवेत्। राजा धर्मात्मा, महात्मा, पिता इव प्रजापालकः, संवैधानिकव्यवस्थायाः पालकः, असहायनागरिकाणां धर्त्ता भर्त्ता च, जितेन्द्रियः, मेधावी नीतिज्ञः च भवेत्। वस्तुतः महाभारतस्यैव शान्तिपर्वणि राज्ञः विषये सम्यक्प्रकारेण लिखितम् यत् –

''राजा प्रजानां प्रथमं शरीरं प्रजाश्च राज्ञोऽप्रतिमं शरीरम्।
राज्ञा विहीनाः न भवन्ति देशाः देशैर्विहीनाः न नृपाः भवन्ति[10]।।

[9] महर्षिवाल्मीकिप्रणीतं रामायणम् – 1.1, 12, 13, 14
[10] महर्षिवेदव्यासप्रणीतं महाभारतम् – 12.67.59